Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २०७
अगस्त - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### चमत्कारमीमांसा

कश्चित् पत्रकारः रविशङ्करमहाराजं प्रति अर्थतन्त्रविषयकं कमपि प्रश्नं पृष्टवान् । महाराजः तु स्वभावतः एव उक्तवान् – 'अस्मिन् विषये अहं किमपि न जानामि ।' महाराजः किमर्थम् एवम् उक्तवान् ? यतो हि सः निर्मलः भक्तः आसीत्, 'बाबा' न ! 'बाबा' चमत्कारं कर्तुं शक्नोति, ऋजुः प्रभुभक्तः न । चमत्कारस्य माया बहुत्र नृत्यन्ती दृश्यते । चमत्कारं प्रति न केवलं दरिद्राः, धनिकाः अपि आकृष्टाः मूढाः च भवन्ति । यत्र चमत्कारः भवति तत्र स्वभावतः एव सम्मर्दः भवति । यत्र च सम्मर्दः भवति तत्र विचारस्य उपस्थितिः प्रायः न भवति ।

अस्मिन् अवसरे चमत्कारमीमांसां कुर्मः । वस्तुतः समाजे सामान्यः मनुष्यः दुर्बलः अस्ति । यः केवलं सांसारिकं सुखं प्रति चिन्तयितुं शक्नोति सः अत्र सामान्यः मनुष्यः इति । सः बहुविधानि कष्टानि सहते । बहुत्र शिक्षितः मनुष्यः अपि पूर्णतः कष्टमुक्तः नास्ति । अपि च निर्धने राष्ट्रे कष्टस्य मात्रा अपि अधिका एव भवति । यथा हि कोऽपि आजीविकाम् अन्विष्यति, कोऽपि सन्तानं काङ्क्षति, कोऽपि वा स्वास्थ्यम् इच्छति । मनुष्यः सर्वतः पराजयते तदा चमत्कारस्य अन्वेषणं करोति । तान्त्रिकाः एतादृशान् दुर्बलान् जीवान् ग्रसितुं मकराः इव सदा तत्पराः भवन्ति । तान्त्रिकः अवसरं विलोक्य इन्द्रजालं दर्शयति । अज्ञः मनुष्यः चिन्तयति यत् यः आकाशात् भस्म पातयितुं शक्नोति, सः 'बाबा' मम कष्टानि अपि नाशयितुं शक्नोति ।

यावत् सामान्यः मनुष्यः कष्टग्रस्तः वर्तते तावत् काले काले कश्चित् 'बाबा' जन्म प्राप्स्यति । बुद्धिसम्पन्ने साधनसम्पन्ने च समाजे चमत्कारस्य बलं नियन्त्रितं भवति । दुर्बलस्य वशीकरणं कष्टसाध्यं नास्ति । सः स्वयमेव तान्त्रिकं प्रति धावित्वा स्वस्य शोषणं कारयति । आशायाः विविधान् पाशान् धृत्वा उपविष्टाः तान्त्रिकाः वदन्ति – 'वत्स ! त्वम् ऋजुहृदयः असि । तव आशा फलिष्यति । केवलं मम वचने श्रद्धां कुरु ।'

चमत्कारः किमपि कठिनं कार्यं नास्ति । ऐन्द्रजालिकः तत् करोति एव । प्रत्येकं तान्त्रिकः केनापि विधिना इन्द्रजालम् एव दर्शयति । उभयोः कश्चित् भेदः वर्तते । ऐन्द्रजालिकस्य कर्मणि मनोरञ्जनं वर्तते, तान्त्रिकस्य कर्मणि केवलं कपटम् ।

ओशो कथयति – 'धर्मस्य चमत्कारेण सह अथवा भवताम् इच्छया सह कोऽपि सम्बन्धः नास्ति । धर्मः तु तादृशस्य क्षणस्य अन्वेषणं वर्तते, यत्र सर्वाः वासनाः शान्तिम् अधिगच्छन्ति ।'

## सर्वं विधेः आयत्तम्

एङ्गायसः साहसप्रियः । सः नौकाचालकनायकः सन् विविधाः कष्टकरीः घटनाः सम्मुखीकृतवान् । जीवनस्य सन्ध्याकाले सः ऐच्छत् यत् मया इतः परं कुत्रचित् प्रशान्ते स्थले गृहं निर्माय सुखजीवनं यापनीयम् इति । अतः सः कस्यचित् पर्वतस्य शिखरे गृहं निर्मितवान् । तस्य जीवने धनाभावः तु न आसीत् । अतः सः गृहकार्याय बहून् सेवकान् नियोजितवान् ।

''वत्स ! भगवान् भवते अपारम् ऐश्वर्यम् अनुभवं च दत्तवान् अस्ति । विशिष्टं किमपि साधयता भवता स्वस्य जीवनस्य सार्थकता सम्पादनीया'' इति तम् अबोधयत् कश्चन हितैषी गुरुः । एङ्गायसः तत् अङ्गीकुर्वन् शिरः तु चालितवान्, किन्तु तदनुगुणं न व्यवहृतवान् । तं परितः सदा बहवः सुहृदः भवन्ति स्म । ते एङ्गायसस्य मनोविनोदाय बहुधा प्रयतन्ते स्म । अतः एङ्गायसः अपि तेषां सन्तोषाय प्रभूतं धनं व्ययीकरोति स्म ।

स च तादृशः कालः आसीत् यस्मिन् च लघूनि राज्यानि परस्परं कलहं कुर्वन्ति स्म । ये जयं प्राप्नुवन्ति ते शत्रुपक्षीयान् सहस्रशः पुरुषान् महिलाः च दासान् कुर्वन्ति स्म । तान् स्वदेशम् आनीय कठिने कार्ये नियोजयन्ति स्म । तेषु सेवकेषु कृतविद्याभ्यासाः बुद्धिमन्तः च बहवः भवन्ति स्म । किन्तु एते स्वामिनः तेषां योग्यतां सर्वथा न पश्यन्ति स्म । कठिने परिश्रमबहुले कार्ये तान् नियोजयन्ति स्म । दासाः अस्वस्थाः मरणावस्थाम् आपन्नाः वा भवन्ति चेदपि स्वामिनः तेषां विषये अल्पाम् अपि करुणां न प्रदर्शयन्ति स्म ।

एङ्गायसस्य अपि बहवः सेवकाः आसन् । तेषां कार्यस्य पर्यवेक्षकः कश्चन निर्दयः क्रूरः च । कदाचित् एङ्गायसः सङ्कल्पितवान् यत् द्राक्षावाटिका काचित् निर्मातव्या इति । अतः तस्य सेवकैः अहोरात्रं शिलामय्यां भूमौ कठिनः परिश्रमः करणीयः अभवत् । स्वेदेन आर्द्रान् तान् कशया ताडयन् सः पर्यवेक्षकः कदाचित् अवदत् – ''त्वर्यताम् त्वर्यताम् । मूर्खाः भवन्तः परमालसाः । अस्माकं स्वामी श्रेष्ठजातीयां द्राक्षां शीघ्रातिशीघ्रं वर्धयितुम् इच्छति । ततः उत्तमस्तरीयं मद्यं निर्मातव्यम् इत्यस्ति तस्य सङ्कल्पः'' इति ।

तस्य कथनं समर्थयन् एङ्गायसः अवदत् – ''आम् । मया आरोपयितुम् इष्टायाः द्राक्षायाः जातिः जगति एव अत्युत्कृष्टा अस्ति । एषा भूमिः अपि तस्याः निमित्तम् अनुगुणा अस्ति इति श्रूयते । अतः आत्मना वर्धितया द्राक्षया निर्मितस्य मद्यस्य प्रथमः चषकः कदा वा चूष्येत इति कातरतया प्रतीक्ष्यते मया'' इति ।

''श्रुतं खलु भवद्भिः ? वर्ध्यमानायाः द्राक्षायाः आधारेण निर्मितस्य मद्यस्य रसस्य आस्वादने नितरां कातरः अस्ति अस्माकं स्वामी । अविलम्बेन कार्यं साधनीयम् । हुँ, त्वरया कार्यं क्रियताम्'' इति कशया कांश्चित् दौर्भाग्यग्रस्तान् ताडयन् अवदत् पर्यवेक्षकः ।

तावता सेवकानां मध्यतः कस्यचित् ध्वनिः श्रुतः – ''हन्त ! अस्माभिः वर्ध्यमानया द्राक्षया निर्मितस्य मद्यस्य आस्वादनं प्रायः कर्तुं नार्हति अस्माकं स्वामी'' इति ।

यद्यपि एषः ध्वनिः क्षीणः एव आसीत् तथापि सः पर्यवेक्षकेण तु स्पष्टतया श्रुतः एव । ''रे मूख ! किम्

उच्यते एतत् भवता ?'' इति क्रोधमिश्रितेन तर्जनस्वरेण अवदत् सः।

एङ्गायसः कुतूहलेन अपृच्छत् – ''किं वदति सः सेवकः ?'' इति।

पर्यवेक्षकः तं सेवकं केशेषु गृहीत्वा आकृष्य स्वामिनः पुरतः उपस्थापयन् अवदत् – ''भ्रान्तमतिः एषः उन्मत्तवचनानि कानिचन वदति। सम्यक् दण्डनीयः अयम्'' इति।

एङ्गायसः तं सेवकम् अवदत् – ''भोः, यत् उक्तं तदेव पुनरपि वदतु तावत् मम पुरतः'' इति।

तदा सेवकः शान्तेन एव स्वरेण अवदत् – ''अस्माकं स्वामी वर्ध्यमानया द्राक्षया निर्मितं मद्यम् आस्वदितुं नार्हति प्रायः इति उक्तं मया'' इति।

क्षणकालं तत्र नीरवता प्रसृता। सर्वे अचिन्तयन् यत् प्रायः एङ्गायसः एतं सेवकं कठोरतया दण्डयेत्, निर्दयं मारयेत् वा इति। किन्तु एङ्गायसेन तथा तु न कृतम्। सः भटान् आज्ञापितवान् – ''एषः पलायनं यथा न कुर्यात् तथा एतस्मिन् विशेषदृष्टिः भवतु'' इति।

कालः गतः। मासाः अतीताः। उत्तमजातीयाः द्राक्षालताः तत्र प्रवृद्धाः। निपुणैः मद्यनिर्मातृभिः द्राक्षारसेन उत्कृष्टं स्वादु मद्यं निर्मितम् अपि। तैः निर्मितस्य मद्यस्य चषकः एङ्गायसस्य पुरतः स्थापितः। एङ्गायसः तत् स्वीकृत्य उत्पीठिकायाः पुरतः उपविश्य आज्ञां कृतवान् – ''आनीयतां सः सेवकः अत्र'' इति।

सर्वे अचिन्तयन् यत् मद्यस्य रुचिम् आस्वदमानः स्वामी तं प्रायः दण्डयिष्यति इति।

सेवकः भटैः आनीतः। सः यथापूर्वं निर्भीकः एव दृश्यते स्म। तस्य मुखे भीतेः रेखापि न आसीत्।

तं दृष्ट्वा उच्चैः हसन् एङ्गायसः – ''भोः, पूर्वं भवता किम् उक्तम् इति किं स्मर्यते ? पश्यतु इदानीम्। एषः अहम् अत्र निर्मितस्य मद्यस्य रुचेः आस्वादनाय उद्युक्तः अस्मि'' इति उक्त्वा सेवकस्य पुरतः स्थित्वा पुनरपि उच्चैः हसित्वा अपृच्छत् – ''किं वक्तुमिच्छति भवान् एतद्विषये ?'' इति।

तदा सेवकः शान्तस्वरेण एव अवदत् –''श्रीमन्! ओष्ठचषकयोः मध्ये अन्तरं भवितुम् अर्हति एव'' इति।

एङ्गायसः अट्टहासं कुर्वन् पानाय मद्यचषकम् उन्नीतवान्। तावता कश्चन भटः वेगेन धावन् तत्र उपस्थाय अवदत् – ''श्रीमन्! कश्चन घोरः भल्लूकः अस्माकं द्राक्षावाटिकां प्रविश्य सर्वं नाशयन् अस्ति'' इति। ''किम्! घोरः भल्लूकः द्राक्षावाटिकां प्रविष्टः अस्ति ?'' इति साश्चर्यं सातङ्कं च वदन् एङ्गायसः चषकम् उत्पीठिकायाः उपरि स्थापयित्वा खड्गं गृहीत्वा तस्य संहाराय वेगेन ततः निर्गतवान्। किन्तु दौर्भाग्यवशात् सः भल्लूकः एव तम् अमारयत्।

उत्पीठिकायाः उपरि स्थापितं तत् मद्यम् अनास्वादितम् एव अतिष्ठत्। अतः एव लोकोक्तिः काचित् श्रूयते – 'ओष्ठचषकयोः मध्ये अन्तरं भवितुम् अर्हति' इति।

एतस्य तात्पर्यम् एतत् यत् 'यदाकदाचिदपि यत्किमपि भवितुम् अर्हति लोके। सुचिन्तिता अपि योजना अन्तिमे क्षणे सर्वथा परिवृत्ता भवितुम् अपि अर्हति एव। सर्वं विधेः आयत्तम्' इति।

## अविमारकम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

( अनुवर्तते)

**सारः** – महाकविभासविरचिते अविमारके एतावता अङ्कचतुष्टये अस्माभिः दृष्टं यत् – उद्यानगतां कुन्तिभोजस्य दुहितरं कुरङ्गीं मत्तगजाद् अविमारकः रक्षितवान्। रक्षणकाले उभो अपि परस्परम् अनुरागवन्तौ अभवताम्। राजा कुन्तिभोजः रक्षकपुरुषस्य (अविमारकस्य) अन्वेषणं कर्तुं मन्त्रिणे आदिशति। पुनश्च तदानीं काशिराजस्य दूतः आगतः कुरङ्गीनिमित्तम्। सः पूजितः पुनरपि स्वदेशं प्रेषितः। कुरङ्ग्याः प्रवृद्धानुरागवतीं स्थितिं विज्ञाय धात्रीनिलिनिके अविमारकं द्रष्टुं गतवत्यौ। ते अविमारकस्याऽपि तादृशीम् अनुरागवतीं स्थितिं दृष्ट्वा सन्तुष्टे। उभयोः कुरङ्ग्यविमारकयोः परस्परं व्याकुलं भावं शमितुं नलिनिका अविमारकम् अन्तःपुररक्षकाणां गमनविषये गुप्तां सूचनां ददाति। सूचनां निवेद्य ते गतवत्यौ। अत्रान्तरे सन्तुष्टनामा विदूषकः तत्र आगच्छति। अविमारकः मित्राय विदूषकाय स्वीयां कामार्त्तां स्थितिं कथयति। विदूषकः अपि मित्रेण एव सार्धं कन्यान्तःपुरं गन्तुं पृच्छति किन्तु अविमारकः तं प्रस्तावम् अपनयति। पुनश्च "अविरूपधारि–राक्षसस्य मारणाद् अविमारकः इति नाम अभवत्" इत्यपि प्रसङ्गं स्मरति। सूचनानुसारम् एकाकी अविमारकः रात्रौ प्रच्छन्नवेषेण कन्यान्तःपुरं प्रविशति। इतश्च न नलिनिकया कुरङ्ग्यै इयम् अविमारकागमनस्य वार्ता न निवेदिता। तत्र नलिनिकां दृष्ट्वा अविमारकः हृष्टः। सुप्ता कुरङ्गी नलिनिका–अविमारकयोः सम्भाषणेन उत्थिता, अविमारकं च दृष्ट्वा विस्मिता। उभौ कुरङ्ग्यविमारकौ एकसंवत्सरं यावत् सुखेन कालं यापितवन्तौ। अथ कदाचिद् राज्ञा अयं वृत्तान्तः ज्ञातः। भीतः अविमारकः कथञ्चित् कन्यान्तःपुरात् निर्गतः। कुरङ्ग्याः विरहेण सः नितरां खिन्नः अभवत्। सः मरितुं बहुशः प्रयत्नं कृतवान्, किन्तु दैवयोगात् सः प्रत्येकं वारं रक्षितः। कदाचित् सः पर्वतशिखरात् पतितुं साहसं कुर्वन् केनचिद् विद्याधरेण दृष्टः। अमानुष्यकम् अस्य रूपमिति विज्ञाय विद्याधरः तस्मै एकम् अङ्गुलीयकं प्रददौ येन सः अदृश्यः भवितुं शक्नुयात्।

ततः विद्याधरः तस्य प्रियया सह गतः। अविमारकः निश्चयं करोति यत् सः पुनरपि नगरं गमिष्यति। श्रान्तः सः शिलातले विश्रम्य सन्तुष्टस्य विदूषकस्य अवस्थां चिन्तयति। विदूषकः अविमारकं मृगयमाणः वनं प्रविष्टः।

दैवयोगेन तयोः मेलनं भवति। अविमारकः विद्याधरेण दत्तस्य अङ्गुलीयकस्य प्रभावं दर्शयति। विदूषकः आश्चर्यचकितः। तौ नगरं गतौ।

पञ्चमाङ्कस्य प्रारम्भे कुरङ्गी नलिनिका च कन्यान्तःपुरे तिष्ठन्त्यौ बहिः पश्यतः। अविमारकः तां दृष्ट्वा विरहाकूलः सन् आरोहति प्रासादम् अदृश्यः सन्। कुरङ्गी भीता, अविमारकं च दृष्ट्वा विस्मिता। मध्ये तावत् सन्तुष्ट–नलिनिकयोः अत्यन्तविनोदी संवादः भवति। कुरङ्गी अविमारकः च सुखेन तत्र निवसतः। षष्ठे अङ्के कुन्तिभोजः सौवीरराजः आर्यभूतिकः च प्रविशन्ति। कुन्तिभोजः सौवीरराजं दुःखितं दृष्ट्वा कारणं पृच्छति। सः कथयति यत् चण्डभार्गवनाम्ना ऋषिणा ते शापिताः। तस्मात् तैः वर्षं यावत् चाण्डालवत् वर्तितव्यम् अभवत्। 'क्लेशेन मृगयमाणेऽपि विष्णुसेनः (अविमारकः) न कुतश्चित् प्राप्तः।' इति भूतिकः निवेदयति। ततः देवर्षिः नारदः प्रविशति। प्रार्थ्यमाने राजभ्यां देवर्षिः कथयति यत् विष्णुसेनः कुरङ्ग्या सह एव गान्धर्वेण विवाहेन कृतोद्वाहः। ततः सः सर्वम् अपि वृत्तान्तं विष्णुसेनसम्बन्धिने कथयति। सर्वे सन्तुष्टाः। ततः परिजनतोषार्थं ते विवाहं कारयन्ति। अविमारकः सर्वान् स्वजनान् अभिवादयति। नाटकस्य समाप्तिः भरतवाक्येन भवति – भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु।'

( समाप्तम् )

# मासवार्ता:






एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाया: प्रचाराय निरन्तरं प्रयत्नं करोति। एतस्मिन् एव उपक्रमे एकलव्य-संस्कृत-एकेडेमीसंस्थानेन अमेरीकादेशे संस्कृतभाषाया: प्रचाराय "एकलव्य-संस्कृत-एकेडेमी, अमेरीका चेप्टर" इति कश्चन प्रकल्प: आरब्ध: वर्तते। संस्थानस्य निदेशक: डॉ. मिहिर: उपाध्याय: संस्कृतभाषाया: प्रचाराय जुलाईमासस्य ६ दिनाङ्कत: अगस्तमासस्य ९ दिनाङ्कपर्यन्तम् अमेरीकादेशस्य विविधराज्यानां विविधेषु नगरेषु प्रवासम् अकरोत्। आयोजनेऽस्मिन् जुलाईमासस्य ८ दिनाङ्के ओहायोराज्यस्य सिनसिनाटिनगरे "Influence & Need of Sanskrit in Our Lives" इति विषये, ९ दिनाङ्के नोर्थकेरोलाईनाराज्यस्य शार्लोटनगरे "Importance of Sanskrit in Modern Times" इति विषये, १० दिनाङ्के ज्योर्जियाराज्यस्य ब्युफोर्डनगरे "Sanskrit: Learn the Language, Discover the Heritage" इति विषये, ११ दिनाङ्के ज्योर्जियाराज्यस्य अटलान्टानगरे "Influence & Need of Sanskrit in Our Lives" इति विषये, १४ दिनाङ्के केन्टकीराज्यस्य लेक्सिङ्गटननगरे "Role of Learning Sanskrit in Current Era" इति विषये, १६ दिनाङ्के इण्डियानाराज्यस्य ग्रीफिथनगरे "Glimpse into the Deep Wealth of Sanskrit" इति विषये, २० दिनाङ्के शिकागोराज्यस्य ब्लुमिङ्गडेलनगरे "Glimpse into the Deep Wealth of Sanskrit" इति विषये, २६ दिनाङ्के इण्डियानाराज्यस्य मन्स्टरनगरे "Subhashit: Treasure of Sanskrit Language" इति विषये, २८ दिनाङ्के इलिनोयराज्यस्य ग्लेनव्युनगरे "Sanskrit & Sanskriti" इति विषये, २९ दिनाङ्के इण्डियानाराज्यस्य मिशिगननगरे "Importance of Sanskrit in Modern Era" इति विषये, अगस्तमासस्य १ दिनाङ्के एरीझोनाराज्यस्य फिनिक्सनगरे "Influence & Need of Sanskrit in Our Lives" इति विषये, ३ दिनाङ्के एरीझोनाराज्यस्य फिनिक्सनगरे "Sanskrit & Sanskriti" इति विषये, ६ दिनाङ्के आरकन्सासराज्यस्य होटस्प्रिङ्गनगरे "Glimpse into the Deep Wealth of Sanskrit" इति विषये च व्याख्यानानि सम्पन्नानि। एतेषु व्याख्यानेषु आहत्य ५४८ जना: भागम् अवहन्।

अत्र उल्लेखनीयं यत् जुलाईमासस्य ११ दिनाङ्कत: १३ दिनाङ्कपर्यन्तम् एटलान्टानगरे बालानां कृते बालसंस्कृतवर्गस्य ज्येष्ठानां कृते संस्कृतभाषाशिक्षणवर्गस्य च आयोजनम् अभवत्। यस्मिन् १८ बाला: २१ ज्येष्ठा: च संस्कृतम् अपठन्। ग्रीफिथनगरे BAPS संस्थाने आयोजिते बालसंस्कृतवर्गे १० छात्रा: भागम् अवहन्। वर्ग: अयं जुलाईमासस्य १७ दिनाङ्कत: १९ दिनाङ्कपर्यन्तं प्राचलत्। इलिनोयराज्यस्य साउथहोलेण्डनगरे जुलाईमासस्य २१ दिनाङ्कत: २३ दिनाङ्कपर्यन्तं त्रिदिवसीय: पूर्णदीनस्य संस्कृतभाषाशिक्षणस्य वर्ग: अपि आयोजित: आसीत्। यस्मिन् १८ छात्रा: प्रात: ९ वादनत: सायं ७ वादनपर्यन्तं संस्कृतभाषाया: अध्ययनम् अकुर्वन्। अत्र उल्लेखनीयं यत् डॉ. मिहिर-उपाध्यायस्य निखिलस्य प्रवासस्य आयोजनं अमेरीकादेशस्य एकलव्य-संस्कृत-एकेडेमी-संस्थानस्य छात्रा डॉ. भारती पटेल: अकरोत्।

## कृपया हसन्तु

रमण: विद्यालयात् शीघ्रं गृहम् आगतवान् । तं दृष्ट्वा -

माता - किमर्थम् अद्य विद्यालयात् शीघ्रम् आगतवान् ?

रमण: - अहम् एकं मशकं मारितवान् । अत: शिक्षिका मां गृहं प्रति प्रेषितवती ।

माता - मशकं मारितवान्, एतदर्थं भवन्तं गृहं प्रति प्रेषितवती ?

रमण: - आं मात: ! मशक: नमनस्य कपोले उपविष्ट: आसीत् ।

★ ★ ★ ★ ★

रोगी - (चिकित्सकम् उपगम्य एकं पत्रं प्रदर्श्य) भो: महोदय ! भवान् एतस्य पत्रस्य उपरि यत् औषधं लिखितवान् तत् कुत्रचिदपि न प्राप्तम् । यतोहि एतत् कोऽपि पठितुम् एव न शक्तवान् ।

चिकित्सक: - भो मूर्ख ! यत् पत्रस्य उपरि लिखितमस्ति तत् न औषधम् । मम लेखनी कार्यं करोति वा न इति द्रष्टुम् अहं तु केवलं लेखनीं चालयित्वा दृष्टवान् आसम् ।

★ ★ ★ ★ ★

रोगी - (वैद्यम् उद्दिश्य) अहं प्रतिदिनं ५० रूप्यकाणाम् औषधं खादन् अस्मि । किन्तु इतोऽपि कोऽपि लाभ: जात: नास्ति ।

वैद्य: - अद्य आरभ्य त्वं ४० रूप्यकाणाम् औषधं स्वीकरोतु तेन तव १० रूप्यकाणां लाभ: भविष्यति ।

## सुभाषितम्

- संस्कृतविकिपीडियाजालस्थानात्

**नास्ति धर्मसमो बन्धुः नास्ति धर्मसमा क्रिया ।**
**नास्ति धर्मसमो देवः सत्यं सत्यं वदाम्यहम् ॥**

**तात्पर्यम्** – अहं सत्यमेव वदामि – धर्मसमानः बन्धुः कोपि नास्ति। धर्मसमं कार्यं न किमपि विद्यते। धर्मसमा देवता अपि कापि नास्ति।

**नास्ति वेदात् परं शास्त्रं नास्ति मातुः परो गुरुः ।**
**नास्ति दानात् परं मित्रम् इहलोके परत्र च ॥**

**तात्पर्यम्** – इहलोके च परलोके च वेदात् परं शास्त्रं नास्ति, मातुः परो गुरुः नास्ति, दानात् परं मित्रं नास्ति।

**नाहं जानामि केयूरे नाहं जानामि कुण्डले ।**
**नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् ॥**

**तात्पर्यम्** – केयूरे (बाह्वोः आभरणम्) अहं न अभिजानामि। कर्णकुण्डले अपि न अभिजानामि किन्तु नित्यं पादाभिवन्दनसमये दृष्टम् इत्यतः नूपुरे तु सम्यक् अभिजानामि। (सीतायाः आभरणं दृष्टवतः लक्ष्मणस्य वचनमिदम्।)

## ज्ञानसरित्

श्यामः पटेलः

**हस्ती हस्ती हस्ती, दिव्या दैवी सृष्टिः ।** नगरेषु ग्रामेषु यदा गजस्य आगमनं भवति तदा न केवलं बालकाः, ज्येष्ठाः अपि गजदर्शनार्थं वीथ्यां समागताः भवन्ति। प्रायः भवन्तः एतादृशस्य दृश्यस्य साक्षिणः स्युः। गजानां जन्मतः प्राकृतिकः शत्रुः कोऽपि नास्ति। एते समेषां मित्राणि भवन्ति। अतः गजः अजातशत्रुः इति ईरितः। अद्य गजस्य विषये विशेषं ज्ञातुं यतामहे । विश्वे गजानां प्रजातिद्वयं वर्तते – 'अफ्रीकाद्वैप्या प्रजातिः', 'एशियाद्वैप्या प्रजातिः' । अफ्रीकाद्वैप्यस्य गजस्य कर्णपुटम् एशियाद्वैप्यस्य गजस्य अपेक्षया त्रिगुणितं बृहद् भवति। गजस्य कर्णौ तस्य शरीरस्य तापमानं समीकर्तुं प्रयुज्येते। किन्तु अफ्रीकाद्वैप्याः गजाः सङ्केतं प्रेषयितुमपि कर्णचालनं कुर्वन्ति। एतादृशाः महाकर्णाः सन्तः अपि तेषां श्रवणशक्तिः न्यूना भवति! किन्तु घ्राणशक्तिः न। गजाः ३ किलोमीटरमितात् दूरात् जलस्य गन्धं घ्रातुं शक्नुवन्ति। ते प्रतिदिनं प्रायः ३०० लीटरमितं जलं पिबन्ति। गजः एव एकतमः प्राणी अस्ति यः कूर्दितुं न अर्हति। ते स्वकीयानां पादानां तलस्थानेन भूमिकम्पनेन दूरे उद्भवमानान् ध्वनीन् श्रोतुं शक्नुवन्ति। गजाः रात्रौ अधिकं न शेरते। ते तिष्ठन्तः एव स्वपन्ति। तेषां शुण्डायाम् अस्थीनि न भवन्ति। किन्तु सार्धैकलक्षं स्नायवः भवन्ति। यद्यपि तेषां त्वक् १ इञ्चमिताः भवति तथापि तादृशी संवेदनशीला भवति येन ते स्वशुण्ड्या भूमौ पतितां सूचिमपि ग्रहीतुं शक्नुवन्ति। तेषां शुण्डायाः अग्रे अङ्गुली इव अवयवः भवति येन ते शरीरे कण्डूयन्ति नेत्रे स्वच्छीकुर्वन्ति च। भारभूताः सन्तः गजाः जले सुदूरं तरणं कर्तुमपि पारयन्ति।

ईरित – said, द्वैप्य – belonging to an island, शेरते / स्वपन्ति – sleeping, शुण्डा – Trunk, त्वक् – skin, कण्डूयन्ति – itching

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **व्यपाश्रयणा** | निवेदन | request |
| **मरीचिः** | किरण | ray of light |
| **कृत्स्नः** | संपूर्ण | whole |
| **स्वातन्त्र्यम्** | स्वतंत्रता | freedom |
| **स्यन्दनः** | रथ | chariot |
| **स्पर्शनः** | वायु | air |
| **सभाजनम्** | सन्मानित | honoured |
| **सचेताः** | पटु | intelligent |
| **सोमः** | चन्द्र | moon |
| **रेवा** | नर्मदानदी | Narmada river |
| **सौदामिनी** | तडित् | lightning |
| **शैलूषः** | नट | actor |
| **शैलेन्द्रः** | हिमालय | the himalayas |
| **निदर्शनम्** | उदाहरण | illustration |
| **निदेशः** | आदेश | order |

## किं भवन्तः जानन्ति ?

**१) एतेषु कः वृष्टेः देवः वर्तते ?**
(क) इन्द्रः (ख) रुद्रः (ग) ब्रह्मा (घ) विष्णुः

**२) एतासु का देवी शक्त्याः प्रतीकं वर्तते ?**
(क) पार्वती (ख) दुर्गा (ग) सरस्वती (घ) लक्ष्मीः

**३) एतासु कस्याः गणना पञ्चकन्यासु न भवति ?**
(क) अहल्यायाः (ख) सीतायाः (ग) मन्दोदर्याः (घ) कुन्त्याः

**४) गोदुग्धे कस्य देवस्य निवासः वर्तते ?**
(क) सूर्यदेवस्य (ख) चन्द्रदेवस्य (ग) वरुणदेवस्य (घ) वासुदेवस्य

**५) गोदध्नि कस्य देवस्य निवासः वर्तते ?**
(क) वरुणदेवस्य (ख) चन्द्रदेवस्य (ग) वायुदेवस्य (घ) सूर्यदेवस्य

**६) गोमूत्रे कस्य देवस्य निवासः वर्तते ?**
(क) चन्द्रदेवस्य (ख) वरुणदेवस्य (ग) शनिदेवस्य (घ) सूर्यदेवस्य

**७) गोघृते कस्य देवस्य निवासः वर्तते ?**
(क) अग्निदेवस्य (ख) वरुणदेवस्य (ग) सूर्यदेवस्य (घ) चन्द्रदेवस्य

उत्तराणि – (१) क (२) ख (३) ख (४) ख (५) ग (६) ख (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## स्तोत्रपाठः

**( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च )**

**Date** : 13/07/2023 to 15/08/2023
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

## स्तोत्रपाठः

**( मातृपूजनम्, शक्रादयस्तुतिः च )**

**Date** : 12/09/2023 to 12/10/2023
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં**
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | – 100 |
| द्वैवार्षिकं | रू | – 175 |
| त्रैवार्षिकं | रू | – 250 |
| अङ्कमूल्यं | रू | – 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006